# नायक्स टयुटोरिअल्स

Way to Excellence

Year : 2025 - 2026
वर्ग : १० वी (SSC)


नमुना प्रश्नपत्रिका - 2
संस्कृत - १००

पूर्णाङ्का : ८०
समय : ३ होराः

---

**प्रथमः विभागः- सुगमसंस्कृतम** (८ अङ्काः)

Q.1 अ) चित्रं दृष्ट्वा नामानि लिखत।(५ तः४) (४)




आ) सङ्ख्याः अक्षरैः /अङ्क लिखत । (३ तः२) (२)

१) ९२  २) सप्तत्रिंशत्  ३) ४८

इ) समय-स्तम्भमेलनं कुरुत। (२)

| | अ | आ |
|---|---|---|
| १. | सार्ध-नववादनम् | १.०० |
| २. | पादोन-त्रिवादनम् | ५.१५ |
| ३. | सपाद - पञ्चवादनम् | ९ .३० |

**द्वितीय विभागः- गद्यम्** (२० अङ्काः)

Q.2 अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (७)

१) अवबोधनम् : (४ तः ३) (३)

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

पृथुवैन्यः स्वप्रजाः दृष्ट्वा चिन्ताकुलः जातः यतः......

(अ) तस्य प्रजाजनाः परस्परं वादविवादं कुर्वन्ति ।

(ब) तस्य प्रजाजनाः पशुवत्जीवन्ति ।

(ख) कः कं वदति ?

'यदि त्वं कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि।'

(ग) पूर्णवाक्येन उत्तरं लिखत ।

वसुन्धरायाः उदरे किं वर्तते ?

(घ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत ।

तद् दृष्ट्वा राजा चिन्ताकुलः जातः ।

२) शब्दज्ञानम् : (४ तः २) (२)

(क) पूर्वकालवाचक-धातुसाधित-त्वान्त-अन्वये चित्वा लिखत।

(ख) गद्यांशात् द्वे विशेषणे चित्वा लिखत।

१.........  २........

(ग) सन्धिविग्रहं कुरुत।

पुरोहितोऽवदत् = -----+------।

Nayak's Tutorials
ISO 9001 : 2015 Certified Institution

३) पृथक्करणम् (२)

- क्रमेण योजरात।

१. पृथुभूपस्य धनुः सज्जीकरणम्।
२. पुरोहितस्य उपदेशकथनम्।
३. भूमेः कृषिकार्यस्य उपदेशनम्।
४. भूमेः स्त्रीरुपं धृत्वा प्रकटनम्।

**आ) गद्यांशं पठित्वा निर्दिष्टाः कृती कुरुत।** (७)

तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं
प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि । अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकानि लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।"
भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत् । वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत् । भूमिम् उर्वरतमां कर्तुं प्रायतत । तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण अकरोत् । अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत् । पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः । धान्यलाभेन सर्वे प्रजाजनाः सन्तुष्टाः च अभवन्। एषः कल्याणकारी नृपः पृथिव्यां प्रशासने अग्रणीः जनसेवाव्रती च अभवत्।

**१. अवबोधनम् (४ तः ३)** (३)

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।
पृथुभूपेन धनुः सज्जीकृतम् यतः.........
(अ) सः शत्रुं हन्तुम् इच्छति स्म।
(ब) सः धनधान्यादि सर्वं वस्तुजातं वसुन्धरायाः प्राप्तुम् इच्छति स्म।

(ख) कः कं वदति ?
"अतः धनुः त्यज।"

(ग) पूर्णवाक्येन उत्तरं लिखत ।
स्त्रीरूपं धृत्वा पृथुनृपस्य पुरतः का प्रकटिता अभवत्?

(घ) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं वा इति लिखत।
पृथुभूपेन खड्गं सज्जीकृतम्।


**२. शब्दज्ञानम् : (३ तः २)** (२)

(क) प्रश्ननिर्माणं कुरुत।
<u>पर्जन्यानन्तरं</u> बीजेभ्यः अङ्कुराः उद्भूताः।

(ख) चतुर्थपदं लिखत।
नैकेभ्यः वृक्षेभ्यः : : नैके.........।

(ग) लकारं लिखत।
अहं प्रसन्ना <u>भविष्यामि</u>।

**३. जलचित्रम्** (२)




Nayak's Tutorials
Way to Excellence
An ISO 9001 : 2015 Certified Institution

इ) **माध्यमभाषया सरलार्थं लिखत। (२ तः १)** (२)

| | |
|---|---|
| शक्रः | महत्तरां भिक्षां याचे। |
| कर्णः | महत्तरां भिक्षां भवते प्रदास्ये। गोसहस्रं ददामि। |
| शक्रः | गोसहस्रमिति ? मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण,नेच्छामि। |
| कर्णः | किं नेच्छति भवान्? अपर्याप्तं कनकं ददामि। |
| शक्रः | गृहीत्वा गच्छामि। नेच्छामि कर्ण, नेच्छामि। |
| कर्णः | तेन हि जित्वा पृथिवीं ददामि। |

| | |
|---|---|
| वैखानसः | - (राजानम् अवरुध्य) राजन्! आश्रममृगोऽयं, न हन्तव्यः,न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम्। |
| दुष्यन्तः- | प्रतिसंहत एषः सायकः । (यथोक्तं करोति) |
| वैखानसः | राजन्! समिदाहरणाय प्रस्थिताः वयम्। एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः |

ई) **माध्यमभाषया उत्तरं लिखत। (२ तः १)** (२)

१. ज्ञानग्रहण विषये शङ्कराचार्याणां किंमतम्?

२. धरित्र्या उपदेशं मनसि मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?

## तृतीय विभागः- पद्यम् (१८)

**Q.3 अ) १) पदांश पठित्वा निर्दिष्टा कृती कुरुत।** (२)

क) पूर्णवाकयेन उत्तरं लिखत।

नारिकेलाः किं न विस्मरति?

ख) विशेषण -विशेष्य-मेलनं कुरुत।

| अ | आ |
|---|---|
| १. अपारस्य | संहतिः |
| २. अल्पानाम् | नभसः |
| | वस्तूनाम् |

ग) उत्तरपदं लिखत।

१. नोपकरणे = न+.......

२. अद्यैव = अद्य+.......

**२) पदांश पठित्वा निर्दिष्टा कृती कुरुत।**


रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।।

Nayak's Tutorials Way to Excellence An ISO 9001 : 2015 Certified Institution

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ।।

२) जलरेखाचित्र पूरयत




**आ) माध्यमभाषया उत्तरं लिखत। (२ तः १)** (२)

१) न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।इति सूक्ति स्पष्टीकुरुत

२) संहतिः कार्यसाधिका इति उक्तिं स्पष्टीकुरुत।

**इ ) पद्ये शुध्दे पूर्णे च लिखत।** (६)

क) विद्या नाम.......विद्याविहीनः पशु।

ख) यदा किञ्चिज्ज्ञोऽहं.....मे व्यपगतः।।

ग) उत्तमो.....प्रजायते।।

घ) यादृशं......फलम्।।

**ई) अन्वयं पूरयत।** २)

.......अतिवक्ता न स्यात्,अधमः......भाषते।.....कांस्ये (ध्वनिः) प्रजायते तादृक ध्वनिः.......न प्रजायते।

**उ) माध्यमभाषया सरलार्थ लिखत।(३ तः २)** (४)

(१) यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।

(२)आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।

(३) एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम्।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।

## चतुर्थः विभागः लेखनकौशलम् [९]

प्रश्न .४ .अ) धातूनाम् /अव्ययानाम् उपयोगं कृत्वाः वाक्यनिर्माण कुरूत (६तः४) ४

१) कुप् (४ पःप) २) अलम् ३)स्निह् (४ प .) ४) स्पृह् (१० उप)

५) परितः ६) वि + रम् (१प .प)

अथवा

संस्कृतानुवादं कुरूत । (६तः४) ४


| | |
|---|---|
| 1) A cat likes milk. | १) मांजरीला दूध आवडते . |
| 2) Raw mangoes are green in colour. | २) कच्च्या आंब्याचा रंग हा हिरवा असतो . |
| 3) I saw a tiger in the forest. | ३) मी जंगला मध्ये वाघ बघितला . |
| 4) Lest your success increase. | ४) आपले यश वाढू दे . |
| 5) The moon is seen at night in the sky. | ५) रात्री आकाशात चंद्र दिसतो . |
| 6) Please give me water. | ६) कृपया मला पाणी दया . |

आ) ५/७ वाक्यात्मकं निबन्धं लिखत ।(३ तः१) ५

१) मम प्रिय उत्सवः। २) मम प्रियः नेता। ३) मम प्रिया भाषा।

अथवा

मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यत्मकं चित्रवर्णनं कुरूत ।




मञ्जूषा - धारयन्ति, वाहयति, शोभते, गर्जति, वर्षति, उत्प्लवते, नयति, वहति, रटति

प्रश्न.५) अ) तालिका पूर्ति कुरूत | ८

(१) नामतालिका पूरयत | (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| नाम | ....... | ....... | प्रथमा |
| ....... | ....... | साधुभिः | तृतीया |
| ....... | रामयोः | ....... | सप्तमी |

(२) सर्वनाम तालिका पूरयत (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| ....... | ....... | केषाम् | षष्ठी |
| अस्यै | ....... | ....... | चतुर्थी |
| माम् - मा | ....... | ....... | द्वितीया |

(३) क्रियापदतालिका पूरयत (६ तः ४) २

| एकवचनम् | ए.व | द्वि.व | ब.व | पुरूष | लकार |
|---|---|---|---|---|---|
| नृत् (४पप) | ....... | ....... | नृत्यन्ति | प्र.पु | लट् |
| रम् (१ आप) | ....... | रमेथाः | ....... | म.पु | लिङ् |
| पठ् (१पप) | ....... | ....... | अपठाम | उ.पु | लङ् |

(४) धातुसाधित विशेषण तालिका (६ तः ४) २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ /शानच |
|---|---|---|---|---|
| ज्ञा (९आप) | ....... | ज्ञातवान् | ज्ञेयः | ....... |
| पत् (१ पप) | पतितः | ....... | ....... | पतन् |
| खाद् (१ पप) | ....... | खादितवान् | खाद्यः | ....... |

आ) निर्दिष्टाः कृतीः कुरूत | (४ तः ३) ९

१) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्ति कुरूत। (५तः३) ३

क) दिनस्य .......(२) अहं भोजनं करोमि। (आवृत्तिवाचकम्)

ख) भोजने ........ (६) रसेषु मधुरः रसः मम प्रियः। (संख्यावाचकम्)

ग) आर्यभट्टः इति भारतवर्षेण प्रेषितः ........ (१) उपग्रहः। ( क्रमवाचकम्)

घ) ........(२) भवने योगेशः निवसति। (क्रमवाचकम्)

ङ) .........(३) महिलाः जलमाहर्तु गच्छन्ति। (सङ्ख्यावाचकम्)

२) समासानां तालिकापूर्ति कुरूत |(४ तः ३) ३

| समास | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| कविपण्डिताः | ......... | इतरेतरद्वन्द्वः |
| ......... | लोकानां प्रियः | षष्ठी तत्पुरूषः |
| सूक्ष्मकणाः | ......... | कर्मधारयः |
| मदान्धः | मदेन अन्धः | ......... |

३) समानार्थकशब्दान् /विरूध्दार्थकशब्दान् लिखत | (५ तः ३) ३

१. उत्साहः × . . . . . . . . . | २. अधमः = . . . . . . . . . |

३. बहूनि × . . . . . . . . . | ४. पादपः = . . . . . . . . . |

५. दृढः × . . . . . . . . |

४) सूचनानुसारं कृतीः कुरूत | (५ तः ३) ३

१) त्वं पादान्स्तब्धीकृत्य तिष्ठ | ('त्वं' स्थाने 'भवान्' योजयत)

२) वयं महामागस्य नामधेयं जानीमः | (वाच्यपरिर्वनं कुरूत)

३) जनाः न सन्तुष्टाः | (वाक्यं एकवचने लिखत)

४) अहं विस्तरेण पठितुम् इच्छामि | (वाक्यं लङ्लकारे परिवर्तयत)

५) मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् | (पुर्वकालवाचकं निष्कासयत)

षष्ठः विभाग - अपठितम् । ८

प्रश्न.५)अ) **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुंरुत।** (६ तः ४) ४

**नर्मदा तीरे विशालः वृक्षः अस्ति। तस्य कोटरे विविधाः खगाः सुखेन निवसन्ति। एकदा गगने मेघाः आगच्छन्ति, गर्जन्ति, वर्षन्ति च। पर्जन्यपीडिताः वानराः तस्य वृक्षस्य तलम् आश्रयार्थम् आगच्छन्ति। खगाः वानरान् पश्यन्ति। एकः खगः वदति - वानराःउष्णकाले पर्जन्यनिवारणार्थं गृहं किमर्थंन कुर्वन्ति ? ते केवलं क्रीडन्ति, परस्परं कलहं कुर्वन्ति, कालस्य अपव्ययं कुर्वन्ति च।**

**आलस्यं दुःखस्य कारणम्। उद्योगेन सर्वे सुखं लभन्ते इति।**

१) **पूर्णवाक्येन उत्तरं लिखित। - कोटरे के निवसन्ति ?**

२) प्रातिपदिकं लिखत। - गगने = _________, वानरान् = _________

३) माध्यमभाषया सरलार्थं लिखत।

खगाः वानरान् पश्यन्ति।

४) कारकपरिचयं कुरुत।

एकः खगः वदति।

५) वाक्यं पुनर्लिखित्वा सत्यं / असत्यं लिखत।

आलस्येन सर्वे सुखं लभन्ते।

६) गद्यांशात् लट् लकारस्य क्रियापदं चित्वा लिखत।

आ) पद्यांश पठित्वा कृतीः कुरुत। ४

विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषुच।

व्याधितस्य औषधं मित्रं धर्मो मित्रं मृतस्य च।।

**(A)** (i) पूर्णवाक्येन उत्तरं लिखत । कः मृतस्य मित्रम् ?

(ii) पद्यान्शात् समार्थकशब्दं चिनुत लिखत च। ज्ञानम् = ________ ।

**(B)** जालरेखाचित्रं पूरयत।

